विचेयो योगेनानिदमुदयवाचामवधिषु ।
प्रकाशानन्दात्मा परिमुषितनिःशेषकलुषः
त्रिभेदातीतो धीनटनचतुसाक्षी विजयते ॥ १ ॥

* *

इह खलु तावदतीतानेकभवपरम्परासमार्जितसुकृतसम्पदावर्जितभगवदनुग्रहासादितसत्त्वप्रसादतया सम्पन्नविवेकवैराग्यादिसाधनो * * आत्मतत्त्वज्ञानमधिगम्य जिज्ञासते ॥

End:

न चाहं बुद्धिरित्येव तया प्रत्यगर्थविवेकस्तत्रापि प्रकृतिपरिणामस्याप्यहमित्येव भानात् किन्तु दृश्यव्यतिरेक ......एवञ्चाहंकारादिसर्वदृश्यावभासा दृशिरेव प्रतीची व्युदपादीति न तदभावप्रसङ्गः । अत एव च नैकत्र-

प्रत्यगर्थद्वयापाचेः । अपि च... ।

Colophon: Nil.

Subject: Siddhāntasiddhāñjanam; A criticism of the Viśiṣṭādhvaita System of Rāmānuja; wants end.

Remarks:—The Ms. is in a fairly good condition. There are four loose leaves at the beginning dealing with some grammatical discussion etc.

The author of this work, Śri Kṛṣṇānandasarasvati lived in the 17th century.

The author had two pupils named Rāmānandayati and Bhāskaradīkṣita.

The Siddhāntasiddhāñjana has a commentary called Ratnatūlikā, written by the author's pupil, Bhāskaradīkṣita.

This work has been published in 4 vols. (Nos. 47, 48, 58 & 61) in the Trivandrum Sanskrit Series. For details about the author's date etc. see introduction to the above edition by Mahāmahopādhyāya T. Ganapati Sastri.

॥ तप्तमुद्राविद्रावणम् ॥

7520. TAPTAMUDRĀVIDRĀVAṆAM.

Burnell's Catalogue No. 9768. Page 98. Right column. Substance—Palm leaf. Size—15¼ × 1¼ inches. Leaves—58. Lines—5 to a Page. Script—Grantha. No. of Granthas—2000. Author—Bhāskaradīkṣita. Complete. Not printed.

Beginning:

ओं साम्बशिवाय नमः ॥

मार्ताण्डातिलकस्वामिमहागणपतीन्वयम् ।
विश्ववन्द्यान्नमस्यामः सर्वसिद्धिविधायिनः ॥
ब्रह्मविष्णुमहेशानां कारणं परमेश्वरम् ।
साम्बन्नौमि शिवादित्यं मायाकल्पितविग्रहम् ॥
क्लेशकर्मविपाकाद्यैरपरामृष्टमीश्वरम् ।
गुरूणाञ्च गुरुं वन्दे विष्णुमोङ्कारशब्दितम् ॥
उमामहेश्वरं नौमि मद्धामसविधालयम् ।
यत्पदाम्भोरुहस्मृत्या स्फुरन्ति सकलाः कलाः ॥
उमामहेश्वराचार्यांश्चोलावनिशिखमणीन् ।
तातपादानहन्नौमि सर्वतन्त्रप्रवर्तकान् ॥
उमामहेश्वराचार्यतनुजो भास्कराध्वरी ।
अस्ति कोनेरिराजेन्द्रपुरवासी बुधोत्तमः ॥
वैतानकर्मनिवहे विहितैकभावा-
मव्याजवाचमपि ये परपूरुषस्य ।
तन्त्रोत्सुकां विदधते स हि तप्तमुद्रा-
विद्रावणं वितनुते विनयाय तेषाम् ॥

इह खलु केचिद्विष्णुभागवता मुक्त्याभाससमाश्रया-स्सन्तः कानि चिद्वेदवाक्यानि तप्तमुद्राधारणविषयतया योजयन्तः प्राकृतजनान्व्यामोहयन्ति । तन्निरासप्रकारं सोपपत्तिकमिह संक्षेपेण प्रदर्शयामः । ते खल्वेवमाहुः—

यद्यपि तप्तचक्रधारणं धर्म्यमित्यत्र न प्रत्यक्षं प्रमाणं धर्मस्य प्रत्यक्षागोचरत्वात्, नाप्यनुमानं श्रुत्यनुपजीविनोऽनुमानस्य धर्मप्रमाणत्वायोगात्, तथापि 'पवित्रन्ते विततं ब्रह्मणस्पते......... ।

End:

श्रीभगवद्गीतायामपि तथा शास्त्रमप्रमाणहेतु कार्याकार्ययोः 'ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि' इति शास्त्रोपजीवनेनैव सर्वेषामाचाराणामनुष्ठेयत्वप्रतिपादनाच्च वेदोक्तकर्म एव कार्येति सिद्धम् ॥

Colophon:

श्रीमदुमामहेश्वराचार्यतनूजभास्करदीक्षितकृतौ तप्तमुद्राविद्रावणे द्वितीयः परिच्छेदः ॥

तप्तमुद्राविद्रावणं समाप्तम् ॥

Leaf No. 67.

इति + विद्रावणे चरणमन्त्रस्य मुद्राधारणपरत्वनिरासप्रकारस्सम्पूर्णः ।

Leaf No. 80.

इति + विद्रावणे सर्वमन्त्राणां तप्तमुद्राधारणविधायकत्वनिरासप्रकारः सम्पूर्णः ॥

Leaf No. 114.

इति श्री + प्रथमः परिच्छेदः ॥

Subject: Taptamudrāvidrāvaṇa, A treatise criticising the practice of branding the sectarian mark on both the shoulders with Śaṅkha and Cakra adopted by Vaiṣṇavas and Mādhvas.

Remarks :—The Ms. is in a fairly good condition. Dr. Burnell has wrongly attributed this work to Śrī Appayya Dīkṣita.

॥ तप्तमुद्राविद्रावणम् ॥

7521. TAPTAMUDRĀVIDRĀVAṆAM.

Burnell's Catalogue No. 6597. Page 93. Right column. Substance—Paper. Size—16×6⅜ inches. Sheets—25. Lines—13 to a page. Script—Devanāgarī. No. of Granthas—1000. Author—Bhāskaradīkṣita. Incomplete. Not printed.

Beginning:

श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः ॥

तप्तचक्रलाञ्छनस्यावैदिकत्वं प्रतिपाद्यते । तत्र तप्तमुद्राधारिण इत्थं श्रुतिं प्रमाणयन्ति । 'पवित्रं ते विततं ब्रह्मणस्पते । प्रभुर्गात्राणि पर्येषि विश्वतः । अतप्ततनुर्न तदामो अश्नुते । शृतास इद्वहन्तस्तत्समाशत । चरणं पवित्रं विततं पुराणं । येन पूतस्तरति दुष्कृतानि । तेन पवित्रेण शुद्धेन पूताः । अतिपाप्मानमरातिं तरेम । लोकस्य द्वारमर्चिमत्पवित्रं । ज्योतिष्मद्भ्राजमानं महस्वत् ।

अमृतस्य धारा बहुधा दोहमानं । चरणं नो लोके सुधितां दधातु । चमूषच्छ्येनः शकुनो बिभृत्वा गोविन्दुर्द्रप्स आयुधानि बिभ्रत् । अपा मूर्तिं सचमानस्समुद्रं तुरीयं धाम महिषो विवक्तीति' ॥

End:

ननु चक्राङ्कस्य शिष्टधार्यत्वमनुमानैस्सिध्यते । तथाहि चक्रं शिष्टैर्धार्यं पवित्रशब्दवाच्यत्वं स्यात्तदा भारतभागवतवैजयन्तिकारेण पवित्रशब्दस्य चक्रे वृत्तिः प्रदश्येत प्रत्युत चक्रादिव्यतिरिक्तेषु वृत्तिर्दर्शिता । किञ्च इदानीमुक्तानुमानमेव पवित्रशब्दवाच्यशूलधारणस्य साधकं स्यात्सत्प्रतिपक्षश्च अङ्कनं दुष्टैर्धार्यमङ्कनत्वात् । पराशरपुराणे—

अतीव पतितानां हि श्वापदाद्यङ्कनं नृणाम् ।
विधीयते तु शुद्धानामतः शुद्धं न चाङ्कयेत् ॥ इति ॥

तस्माद्वैदिकैस्तप्तमुद्रा न धार्येति सिद्धम् ॥

Colophon:

श्रीरामाय नमः । तप्तमुद्राविद्रावणं समाप्तं । श्रीकृष्णार्पणमस्तु ॥

(Leaf No. 10)

इति चरणमन्त्रस्य तप्तमुद्राधारणात्वभङ्गः ॥

Subject: Same as No. 7521.

Remarks: —The Ms. is in good condition. The Ms. wants the introductory verses and a few sentences at the beginning.

॥ तप्तमुद्राविद्रावणम् ॥

7522. TAPTAMUDRĀVIDRĀVAṆAM.

Burnell's Catalogue No. 9764. Page 93. Right column. Substance—Palm leaf. Size—21 × 1¼ inches. Leaves—21. Lines—7 to a Page. Script—Grantha. No. of Granthas—1000. Author—Bhāskaradīkṣita. Complete. Not printed.

Beginning, end and subject—Same as No. 7521.

Colophon: Nil.

Remarks:—The Ms. is in a decaying condition. Leaves are eaten by rats.

After the colophon is given—

इदं पुस्तकं भूपतिपुरनिवासिना शेषेण लि(खितम्) ।

॥ तप्तमुद्राविद्रावणम् ॥

7523. TAPTAMUDRĀVIDRĀVAṆAM.

Burnell's Catalogue No. 9765. Page 93. Right column. Substance—Palm leaf. Size—17¾ × 1½ inches. Leaves—37. Lines—7-11 to a Page. Script—Grantha. No. of Granthas—1000. Author—Bhāskaradīkṣita. Complete. Not printed.

Beginning:

प्रणम्य पार्वतीनाथं परमानन्दविग्रहम् ।
तप्तचक्राङ्कनस्यात्रावैदिकत्वं विभाव्यते ॥

तत्र केचित् तप्तमुद्राधारणे श्रुतिमपि इत्थं प्रमाण-
यन्ति । तथा हि— पवित्रं ते विततं०

Same as No. 7521.

End, colophon and subject—Same as No. 7521

Remarks:—The Ms. is in a fairly good condition. After the colophon is given—

'ई तप्तमुद्राविद्रावणं वेङ्कटरङ्गय्य ग्रन्थलिपिनि व्राशि-
सम्पूर्णमु शेशिन आकुलु अण्टिकि पुस्तकं ओकटि सम्पूर्णं ।
राजश्री शाहजिमहाराजुवारु व्रायिञ्चिन पुस्तकमु' ॥

This Ms. was written by Venkatarangayya a Telugu Brahmin at the bidding of Śāhjī Mahārāj (1648-1710) A. D.

॥ तप्तमुद्राविद्रावणम् ॥

7524. TAPTAMUDRĀVIDRĀVAṆAM.

Burnell's Catalogue No. 9766 a. Page 93. Right column. Substance—Palm leaf. Size—$19\frac{1}{2} \times 1\frac{1}{4}$ inches Leaves—58 (1-58). Lines—4 to a Page. Script—Grantha. No. of Granthas—1000. Author—Bhāskaradīkṣita. Complete. Not printed.

Beginning, end, colophon and subject—Same as No. 7521.

Remarks:—The Ms. is in a fairly good condition. The other work contained herein is मध्वविध्वंस.

॥ आत्मपरीक्षा ॥

7525. ĀTMAPARĪKṢĀ.

S. S. Collection No. 102.

Substance—Palm leaf. Size—15 × 1⅜ inches. Leaves—72. Lines—7 or 8 to a Page. Script—Grantha. No. of Granthas—2000. Author—Bhāskaradīkṣita. Incomplete. Not Printed

Beginning: (First Prakaraṇa)

......श्रोतव्य इति विधितो वा पुरुषार्थोपयोगि तत्र

........निर्णयरूपफलसामर्थ्याद्वा * *

(Second Prakaraṇa)

कीर्तिमत्यास्तटे रम्ये निवसन्तं महेश्वरम् ।

पश्चिमाभिमुखं सौम्यं वन्दे ताञ्च म(हेश्वरीम्) ॥

स्यादेतत् अत्र...कर्तुरीत्या अन्तःकरणासंवलितः केवल एवात्माऽहमर्थः । तथापि तस्मिन् कर्तृत्वादिधर्मो न वास्तवः । किन्तु भ्रमगृहीत एव ॥

(Third Prakaraṇa)

कावेरीस्नानसंशुद्धान् वेदवेदाङ्गपारगान् ।

द्रामिडानन्वहं वन्दे शिवभक्तिपरायणान् ॥

(Fourth Prakaraṇa)

उमामहेश्वराचार्यान् चोलदेशेषु विश्रुतान् ।

तातपादानहं नौमि सर्वतन्त्र(विशार)दान् ॥

अस्मत्तातगुरून्वन्दे नृसिंह्माश्रमयोगिनः ।
येषान्तत्त्वविवेकाद्याः कृतयः कृतजीविकाः ॥

End:

तथा च दृक्दृश्ययो........(आध्या)सिकसम्बन्धदुर्व्यसनेन । किञ्च सर्वथाऽध्यासिकसम्बन्धव्यतिरेकेण सम्बन्धान्तरापलापे वेदान्तनिष्ठशक्तितात्पर्ययोर्ब्रह्मणा जीवाश्रिताऽज्ञानस्य च ज्ञे.......ण व्यवहारस्य च व्यवहर्तव्येन मिथ्यात्वशरीरान्तर्गताभावस्य प्रतियोगिनःत्वदुक्तदूषणस्य च दूष्येण त्वद्वाक्यस्य चार्थेन श्रवणमननादीनाञ्च श्रोतव्यादिरू * * *
ज्ञानज्ञेययोरध्या... ॥

Colophon:

इति श्रीचोलदेशाभरण कोनारिराजपुरवास्तव्यहारितान्वयप्रसूतसर्वविद्यासम्प्रदायप्रवर्तकश्रीमदुमामहेश्वराचार्यतनुजभास्करदीक्षितविरचितायां आत्मपरीक्षायां शरीराध्यासपरीक्षाख्यं तृतीयं प्रकरणम् समाप्तम् ॥

Subject: Ātmaparīkṣā 1-4 Prakaraṇas.

1. अहमर्थपरीक्षाप्रकरणम
2. मनोधर्मपरीक्षा ,,
3. शरीराध्यासपरीक्षा ,,
4. ?

Remarks:—The Ms. is in a very decaying condition.

Bhāskaradīkṣita, the author of this work is identical with the author of the Taptamudrāvidrāvaṇa. From his own verses, we come to know that his father, Umāmaheśvara was very learned and was the disciple of the famous Śrī Nṛsimhāśramin. One Umāmaheśvara is the author of two Vedantic works named Advaitakāmadhenu and Tattvacandrikā. If he as is said here is his father, he was a disciple of Nṛsimhāśramin and a contemporary of Dharmarājādhvarin and should have flourished in 17th century A. D. The author states that he belongs to a village Konerirājapuram and is of Hārītagotra. This author along with another Rāmānandayati is a disciple of Kṛṣṇānandayati to whose work Siddhāntasiddhāñjanam he wrote a commentary called Ratnatūlikā.

॥ अद्वैतकामधेनुः ॥

7526. ADVAITAKĀMADHENUḤ.

Burnell's Catalogue No. 9823 a. Page 94. Right column. Substance—Palm leaf. Size—16½ × 1½ inches. Leaves—1-112. Lines—3-7 to a Page Script—Telugu. No. of Granthas—2000. Author—Umāmaheśvara. Incomplete. Not Printed.

Beginning:

.......इति प्रत्राच सत्यत्वसिद्धिर्वक्तव्या ध......विज्ञा-
नप्रतिज्ञासिध्यर्थं धर्मज्ञानस्य वियदादिका....त्यत्र केचि-
द्वक्तेवति चेन्न(?) ज्ञातृत्वं हि ज्ञानगुणाश्रयत्वं । ज्ञानं
चास्य सत्यस्य स्वाधिकरणे स्वेन रूपेणाभिनिष्पद्यत इति

श्रुतौ स्वर....रूपेणाविर्भूत इति पूर्वपक्षं कृत्वा नित्यसिद्धेन स्वरूपेणेह विभासत इति सिद्धम् ॥

End:

तस्य दुरुद्धरत्वे च भोक्तुः शारीरस्य अभोक्तृत्वावेदिकामिमां ना(?)शारीरकमीमांसेति समाख्यायाः सिद्धत्वात्तद्वशादपि समन्वयसूत्राणां प्रत्यगात्मपरत्वं सिद्धम् ।

Colophon:

सिद्धस्समन्वयोऽध्यायः प्रत्यगात्मैकगोचरः ।
एतेन ब्रह्ममीमांसा समस्तापि विचारिता ॥

अद्वैतकामधन्वाख्या कृतिरेषा मनीषिभिः ।
सेव्यतां सूत्रतात्पर्यसुधारसपिपासुभिः ॥

इति श्रीबल्लालकुलसंभवेन उमामहेश्वरेण विरचितायामद्वैतकामधेनौ द्वितीयः परिच्छेदः ।

अद्वैतकामधेनुस्समाप्ता ॥

Subject: Advaitakāmadhenu, a Prakaraṇa in 2 Paricchedas.

Remarks:—The Ms. is in a fairly good condition. The other work contained herein is Pūjāvidhāna. The author calls himself as belonging to Ballālakula. He is also the author of another Advaitic work named Tattvacandrikā wherin he says that he was the disciple of one Appayyaśastrin. He appears to be a South Indian who read also under Nṛsimhāśramin the Guru of Dharmarājādhvarin.

॥ अद्वैतकामधेनुः ॥

7527. ADVAITAKĀMADHENUḤ.

Burnell's Catalogue No. 9824 b. Page 94. Right column. Substance—Palm leaf. Size—$9\frac{1}{2} \times 1\frac{7}{8}$ inches. Leaves—70 (68-137). Lines—10-12 to a Page. Script—Telugu. No. of Granthas—2000. Author—Umāmaheśvara. Incomplete. Wants beginning. Not Printed.

Beginning:

....त्वैरभिमतं नित्यत्वं विभुत्वं च न सिध्येत् । 'अविनाशी वाऽरेऽयमात्मा' इत्यादिश्रुतेः । 'नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः' इति सूत्राच्च नित्यत्वसिद्धिर्वक्तव्या । धर्मज्ञानस्यात्मत्वाभावे श्रुतिसूत्राभ्यां नित्यत्वं कथं सिद्धयते ।

Same as 7526.

End, colophon and subject—Same as No. 7526.

Remarks:—The Ms. is in good condition. The other work contained herein is Advaitasiddhi. It is given on a slip in Telugu at the beginning that the author of this work is Abhinava-Kālidāsa.

॥ तत्त्वचान्द्रिका ॥

7528. TATTVACANDRIKĀ.

Burnell's Catalogue No. 6281. Page 91. Right column. Substance—Paper. Size—$11\frac{1}{8} \times 6$ inches. Sheets—118.

Lines—11-16 to a Page. Script—Devanāgarī. No. of Granthas—8000. Author—Umāmaheśvara. Complete. Not Printed.

Beginning:

श्रीमद्वटाटवीनटाधिराजाय नमः ।

हस्ताभ्यां पुस्तकं शस्तं व्याख्यामुद्रां च बिभ्रतम् ।
जटाधरं तपोनिष्ठं मुञ्चिकेशमुनिं भजे ॥ १ ॥

श्रेयांसि मम भूयांसि दत्तां किमपि दैवतम् ।
अर्धांगमंगना यस्य शेखरः क्षणदाकरः ॥ २ ॥

हरलीलावताराय शंकराय वरौजसे ।
कैवल्यकलनाकल्पतरवे गुरवे नमः ॥ ३ ॥

गुरून्प्रज्ञाजितगुरून् आनम्याप्पयशास्त्रिणः ।
प्रविष्टो निगमान्ताब्धिः यदनुग्रहनौकया ॥

उमामहेश्वरज्ञेन बल्लालकुलजन्मना ।
क्रियते निर्गुणब्रह्ममीमांसातत्त्वचन्द्रिका ॥

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेद इति मन्वादयो जगुः ॥

सर्ववेदान्तवाक्यानां उपबृंहणसंमता ।
भगवत्पूज्यपादीया व्याकृतिः परिदृश्यते ॥

मध्वरामानुजादीनामुपबृंहणवैरिणी ।
श्रुत्यन्तव्याहृतिस्सर्वास्समनीषैकमूलिका ॥

श्रुतिस्मृतिपुराणानि कल्पयित्वा स्वबुद्धितः ।
निर्व्यूढं दर्शनं स्वीयं मध्वेन प्रतिभावता ॥

रामानुजस्तु यतिराट् प्रसिद्धानां जगत्त्रये ।
शैवब्राह्मपुराणानां प्रमाणानामपि स्वतः ॥

वेदार्थप्रथनार्थानामप्रामाण्यं प्रकल्पयन् ।
वैष्णवानि पुराणानि व्याकुर्वंश्च स्वबुद्धितः ॥

तन्त्रं निरवहत्स्वीयं स्वकीयमतिवैभवात् ।
अकल्पयन्नसिद्धानि प्रसिद्धान्यविनाशयन् ॥

निमील्य नेत्रे वेदानामुपबृंहणवर्त्मनि ।
स्वोत्कण्ठयैव श्रीकण्ठः श्रुत्यर्थं स त्वकल्पयत् ॥

तस्मादेतन्मतः(?) स्वस्त्यै सांप्रतं प्रयतामहे ।
भाष्यं रामानुजस्यात्र श्रीकण्ठस्यापि दृश्यते ॥

मध्वविध्वंसने मध्वन्यक्कारे च महात्मभिः ।
मध्वदर्शनमामूलमूलं भस्मीकृतं यतः ॥

ततस्तद्दूषणायात्र साक्षान्नैव प्रयत्यते ।
न्यायसाम्यात्तु तस्यापि स्यादेवात्र निराकृतिः ॥

सर्ववेदान्तवाक्यानां अन्तरेणोपबृंहणं ।
स्वबुद्धिमात्रव्याख्यानं यतो मध्वादिभिः कृतम् ॥

ततो मध्वादितन्त्राणि मृषा शाक्यादितन्त्रवत् ।
इति प्रसाध्यते यस्माद्गुरूणां करुणाबलात् ॥

ॐ अथातो ब्रह्मजिज्ञासेत्यारभ्य अनावृत्तिःशब्दादित्येवमन्ते ब्रह्ममीमांसाशास्त्रे संशयः। किमिदं जीवब्रह्मभेदजगन्मिथ्यात्वपरं नेति कुतस्संशयः। तत्तद्विरुद्धार्थानेकसूत्रदर्शनादिति ब्रूमः ॥

End:

सकलवेदोपबृंहणन्यायानुगृहीतस्य भगवत्पादीयविवरणस्यैव अतिरमणीयत्वेन शरणीकरणीयत्वात् ॥ अथातो ब्रह्मजिज्ञासेत्यारभ्य अनावृत्तिःशब्दादित्येवमन्तं कृत्स्नं ब्रह्मणि मीमांसाशास्त्रं जीवब्रह्माभेदजगन्मिथ्यात्वपरमिति सिद्धम् ।

Colophon:

इति श्रीबल्लालकुलसंभवेन उमामहेश्वरेण विरचितायां तत्त्वचन्द्रिकायां फलाध्यायविचारो नाम द्वादश उल्लासः ।

Subject: Tattvacandrikā, a polemic in 12 ullāsas against the anti-advaitic interpretations of the Brahmasūtras.

Remarks:—The Ms. is in a fairly good condition. Alternate sheets are sulphurated. On the title page of the Ms. are given—

'श्रीशरभेन्द्रभूपतिनार्जितं पञ्चनदे ॥'

For details see remarks under No. 7526.

॥ तत्त्वचान्द्रिका ॥

7529. TATTVACANDRIKĀ.

Burnell's Catalogue No. 6386. Page 91. Right column. Substance—Paper. Size—15 × 5¾ inches. Sheets—154. Lines—14-16 to a Page. Script—Telugu. No. of Granthas—8000. Author—Umāmaheśvara. Complete. Not printed

Beginning:

उमामहेश्वरङ्गेन॰ Same as No. 7528.

End, colophon and subject—Same as No. 7528.

Remarks:—The Ms. is in a fairly good condition.

॥ विवेकसिन्धुः—परमार्थबोधः ॥

7530. VIVEKASINDHUḤ—PARAMĀRTHABODHAḤ.

Burnell's Catalogue No. 6366. Page 93. Left column.

Substance—Paper. Size—9¾ × 5 inches. Sheets—22. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—460. Author—Mukundamuni. Complete. Pūrvārdha only. Not printed.

Beginning:

श्रीगणेशाय नमः ॥

अगुणाय गुणाढ्याय स्वेच्छायानन्दरूपिणे ।
शुद्धाय स्वप्रकाशाय श्रीराममुनये नमः ॥ १ ॥

अपारसंसारसमुद्रमग्न-
जीवालिसंतारणकारणाय ।
यः प्रादुरासीत्पुरुषोऽविनाशी
तं रामचन्द्रं मुनिमानतोऽस्मि ॥ २ ॥

रामचन्द्रपदांभोजमकरन्दालिवृत्तिना ।
मुकुन्दमुनिनाऽद्वैतज्ञानसर्वस्वमुच्यते ॥ ३ ॥

श्रीमन्मुनीन्द्रेण मुकुन्दनाम्ना
विनिर्मितोऽनन्तमुनेस्सुखाय ।
विवेकसिन्धुर्यमनुप्रविश्य
सद्यः पुमानेति हरिस्वरूपम् ॥ ४ ॥

* * *

सत्वरजस्तमोगुणरहितस्य सर्वप्रमाणानन्तविद्यारहि-

तस्य केवलब्रह्मणः सृष्टिकर्तृत्वं कथं घटते। एतादृशं ब्रह्म जगतः कारणमिति न वदन्ति सूक्ष्मतत्त्वज्ञाः निरालम्बसिद्धा ब्रह्मवादिनः। तर्हि किं पुनः कारणम्। मायाशबलं ब्रह्म कारणमिति वदन्ति।

End:

उत्पद्यमानं च ज्ञानं किमज्ञानं निश्शेषं नाशयति ज्ञानं वानिश्शेषं नाशयतीति चर्चायामज्ञानं निश्शेषं नाशयत् स्वयमपि नाशमवाप्नुवत् ज्ञानं मात्रावशेषयति॥

Colophon:

इति श्रीमद्विवेकसिन्धुग्रन्थः पूर्वार्धः समाप्तः। श्रीरस्तु॥

(Sheet No. 21)

इति श्रीसकलयोगीश्वराचार्यश्रीहरिनाथचरणारविन्दानवरतशुश्रूषाप्रसादलब्धज्ञानतरणिकिरणश्रेणिनिरस्ताविद्याधिकारश्रीरामनाथमुनीन्द्रचरणारविन्दमकरन्दास्वादनलंपटेन निरस्ताखिलसंसारेण श्रीमुक्तिनाथमुकुन्दमुनिना रचितो निखिलाज्ञानवनविदहनपटुः परमार्थबोधः समाप्तः॥

Subject: Vivekasindhu; Pūrvārdha alone known as Paramārthabodha; a treatise dealing with Advaitavedānta.

Remarks:—The Ms. is in a fairly good condition.

After the colophon are given some verses introduced with the words:—

अथ शिष्याणां अज्ञातगुरुपङ्क्तिकथनम् ।

The Guruparampara given in this verse is—

विष्णुमुनिः (हरिनाथः)
|
राममुनिः
|
मुकुन्दमुनिः (मुक्तिनाथः)

At the end of these verses is seen this colophon—

इति श्रीमद्विवेकसिन्धुग्रन्थः पूर्वार्धस्समाप्तः ।

Mukundamuni seems to have written this Prakaraṇa for the sake of one Anantamuni. Rāmānanda, the author of the Sūtravṛtti called Brahmāmṛtavarṣiṇī is the pupil of this Mukundānanda. This Mukundamuni is also the author of a bigger work, Mahābhāṣya, a Monistic expression of Upaniṣadic doctrine published in Mahārāṣtra Kavi Series. The author is also known by the name Mukundarāja. This author must be distinguished from another Mukunda the author of a Vedāntic poem named Sujñānaviṁśati.

॥ विवेकसिन्धुः—परमार्थबोधः ॥

7531. VIVEKASINDHUḤ—PARAMĀRTHABODHAḤ.

Burnell's Catalogue No. 6563. Page 94. Left column.

Substance—Paper. Size—8¾×4¾ inches. Sheets—5. Lines—14 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—Mukundamuni. Incomplete. Not printed.

Beginning:

अगुणाय गुणाढ्याय स्वेच्छानन्दस्वरूपिणे ।
शुद्धाय स्वप्रकाशाय श्रीराममुनये नमः ॥ १ ॥

निर्गुणस्याप्रमेयस्य शुद्धस्यैकस्य चात्मनः ।
कथं सर्गादिकर्तृत्वं ब्रह्मणो ह्युपपद्यते ॥ २ ॥

सत्वरजस्तमोगुणरहितस्य सर्वप्रमाणातीतस्य विद्याविद्यारहितस्य केवलस्य ब्रह्मणः सृष्टिकर्तृत्वं कथं घटते ॥

Same as No. 7580.

End:

निरूपाधिकरूपं विना तद्धर्मेषु सन् तस्यामप्यवस्थायां स्वहिरण्यगर्भस्ति....धर्मेषु सज्जन् तस्यामवस्थायां तदेव व्याकृतं तद्धर्मेषु सज्जन् तस्यामप्यवस्थायां ब्रह्मादीन् सज्जन् तस्यामप्यवस्थायां तावकोऽहमिति प्रश्नो न युज्यते ॥
एतत्... ।

Subject: Vivekasindhu. Paramārthabodha. The name given by the scribe in the margin is Guruśiṣyasaṃvāda.

Remarks:—The Ms. is in a fairly good condition. For remarks see under No. 7530. Dr. Burnell describes this as a different work.

॥ विवेकसिन्धुः—परमार्थबोधः ॥

7532. VIVEKASINDHUḤ—PARAMĀRTHABODHAḤ.

Burnell's Catalogue No. 6367.

Substance—Paper. Size—9¾ × 5 inches. Sheets—18. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—416. Author—Mukundamuni. Complete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥

ज्ञानब्रह्माण्डयोरैक्यं लिङ्गसूत्रात्मनोरपि ।
स्वोपाव्याकृतयोरैक्यं क्षेत्रज्ञपरमात्मनोः ॥ इति ।

व्यष्टिसमष्टिसमरूपस्थूलमेकमेव । व्यष्टिसमष्टिरूपमप्येकमेव । व्यष्टिसमष्टिरूपं कारणमप्येकमेव । व्यष्टिसमष्टिरूपं चैतन्यमप्येकमेव । चैतन्यस्य व्यष्टिसमष्टिता कथमिति चेत् । इत्थं । अव्यक्तव्यक्तभावानां ज्ञानोपाधि चैतन्यं ।

End:

प्रबुद्धाखिलमोहोऽपि लोककार्यं तथात्मवत् ।

इत्येतत् ।

वेदान्तसारसर्वस्वं पाषण्डा नैव मन्यते ।
किञ्जानीयुरिमे पापाः हताः स्वीयाऽसदुक्तिभिः ॥

पाषण्डानाममुक्तानां नृणामुत्पथगामिनाम् ।
एतद्विज्ञानसर्वस्वं मतिमान्न प्रकाशयेत् ॥

शुद्धानां गुरुभक्तानां श्रद्धालूनां सुशीलिनाम् ।
दयावतां सुशिष्याणां ज्ञानमेतत्प्रकाशयेत् ॥ २ ॥

आत्मज्ञानैकमूले भवसलिलनिधौ क्लिश्यमानान् मनुष्यान्
दृष्ट्वा ज्ञानोपदेशात् करुणहृद·· याक्रान्ततत्तारणेच्छुः ।
विष्णुर्भूमौ युगेऽस्मिन् हरिरिति गदितः श्रीमतोऽध्यन्दिनीयः
स्वाध्यायप्रोक्तसर्वं स्ववितरणे(?) जनितख्यातिरग्रेऽवतीर्णः ॥

ज्ञानानेन सताध्यनेन तपसा स्वाराधितो धूर्जटिः
पूर्णाहुत्यवसान···समये प्रादुर्बभूव क्षणात् ।
अग्नेराग्निरिवापरः प्रकटितज्ञानैकमूर्तिस्तदा
मत्तः किं त्वमितीप्स्यसीत्यभिदधे तस्याग्रतस्तास्थिवान् ॥ ५ ॥

तत्तस्योपदिदेश सांगमखिलं यत्तेन जिज्ञासितं
मोदं मेदुरयन्नुवास चतुरः स्वान्ते च तस्य क्षणम् ।
पार्वत्या सहितः शिवः शिववपुः तस्मिन्पुरस्तात्स्थिते
पश्यन्त्येव सविस्मये सकुतुके विप्रे कुलान्तर्दधे ॥ ६ ॥

वेदान्तप्रतिपाद्यतत्त्वरहस्यं ज्ञात्वादिनाथाद्धरिः
सच्छिष्यानधिकारिणो बहुतरान् सम्बोध्य तत्त्वं परं ।
तन्मध्ये गुणवत्तरमधिमसं(?) श्रीरामनाथं मुनिं
साम्राज्येऽभिषिषेच योगघनिश्चं पट्टान्वितं योगिनाम् ॥ ७ ॥

ज्ञाने कस्याधिकारो भवति बहुतरेष्वेषु शिष्येषु मध्ये
ध्यात्वैवं स्वेन चित्ते सकलगुणनिधिः श्रीमुकुन्दं मुनीशः
निश्चित्याथान्वगृह्णान्निखिलमपि तदा ज्ञानसर्वस्वमस्मै
सच्छिष्यायोग(प)दिष्टं प्रसरति बहुशः किं च सश्चीयते च ॥

सच्छिष्यत्वमवाप्य सम्यगखिलाम्नायोक्ततत्त्वार्थवित्
भूत्वेमं कृतवानमन्दमतिमान् रामान् मुकुन्दो मुनिः ।
मन्दामन्दविबोधनाय सदयो ब्रह्मात्मबोधाभिध-
ग्रन्थं धीरमनोहरं परिमितैः वाचां विलासैः परैः ॥ ९ ॥

शिष्येष्वन्येषु सत्स्वप्यहमधिककृपापात्रमस्यास्मि जातो
ग्रन्थं मह्योभसिन्धौ कुरु शिशुसुगमं ज्ञानसर्वस्वसारम् ।
एवं विज्ञापितः सन्नवमतशिरसाज्ञानवेदेन धीमान्
सद्यः कृत्वादिनास्मै सकलकरुणहृदयः श्रीमुनीन्द्रो मुकुन्दः ॥

Colophon:

इति श्रीमन्मुकुन्दविरचिते परमार्थबोधे सच्चिदानन्दविवे-
को नाम तृतीयं प्रकरणं समाप्तम् ॥

Subject: Vivekasindhu: Paramārthabodha.

Remarks:—The Ms. is in a fairly good condition. This Ms. also contains the Muniparamparā given at the end of 7530. Dr. Burnell mistakes this to be a different work from No. 7530. For remarks see under No. 7530.

॥ अद्वैतभूषणम् ॥

7533. ADVAITABHŪṢAṆAM.

Burnell's Catalogue No. 9886. Page 95. Right column. Substance—Palm leaf. Size—15×1½ inches. Leaves—31. Lines—6 to a page. Script—Grantha. No. of Granthas—500. Author—Bodhendrayati. Incomplete. Not printed.

Beginning:

यस्मिन्नध्यस्तमेतद्वियदनिलमुखं विश्वमाभात्यबोधात्
ज्ञातः पूरे गभस्तिष्विव मरुधरणिसंश्रितेष्वब्जबन्धोः ।
तं मे वेदान्तविद्या हृदि सततलसन्नित्यनिर्द्वन्द्वरत्नं
विद्यैकप्राप्यमाशु स्फुरति हृदि सुखज्ञानसत्यात्मरूपम् ॥

अखण्डसच्चिदानन्दमात्मानं भुवनेश्वरम् ।
उमासहायं श्रीकण्ठं दक्षिणामूर्तिमाश्रये ॥

विघ्नान्धकारसन्दोहनिवर्तनविवस्वते ।
गणेशाय नमस्तुभ्यं वाक्यार्थज्ञानहेतवे ॥

विश्वरूपं च विश्वेशं विश्वसत्ताप्रदं शिवम् ।
वेदयोनिमहं वन्दे व्यासं वेदार्थसिद्धिदम् ॥

यमाश्रिता सती देवी नन्दयत्यात्मनं श्रितान् ।
तमाश्रये श्रिया जुष्टं शंकरं करुणानिधिम् ॥

व्याख्यावाचोतिदृप्यत्सुरवरतटिनीभङ्गभङ्गप्रवीणा
ज्ञात्वा त्यक्त्वाभिमर्शा झटिति भयहरभ्रान्तनेत्राय यस्य ।
यावन्तो द्वैतिषण्डा श्रुतिशिखरवचोभाववोधैकदक्षं
गीर्वाणेन्द्रं प्रपद्ये गुरुवरमनिशं तद्यथार्थाभिधानम् ॥

गीर्वाणेन्द्रयतीन्द्राणां चरणांबुरुहद्वयम् ।
स्वर्गापवर्गदं पुंसां नौमि विघ्नोपशान्तये ॥

टीकातन्मूलभाष्यादीन् सम्यक्बोधेन्द्रसंयमी ।
आलोच्य तत्वं ....करोत्यद्वैतभूषणम् ॥

धर्मजिज्ञासासूत्रे ह्येतदवस्थितं । स्वाध्यायोऽध्येतव्य इत्यध्ययनविधेः अदृष्टार्थत्वमुत दृष्टार्थत्वमिति विमर्शे विधिवशाद्दृष्टार्थत्वं । न च फलाभावः । विश्वजिन्न्यायेन स्वर्गस्य रात्रिसत्रन्यायेनार्थवादिकघृतकुल्यादेर्वा फलत्वोपपत्तेः ।

End:

'परामर्शस्य दुःखाभावविषयत्वात् दुःखाभावोऽपि प्र-

तियोगिज्ञानाभावान्नानुभवितुं शक्यते' इति न तस्या-

प्यनुसंधानमिति चेत्र् तर्हि उत्थितस्य सुषुप्तौ दुःखकारणा-

भावप्रतिसन्धानादर्थापत्त्या तत्कल्पनमस्तु । अस्मन्मते

तु......... ॥

Subject: Advaitabhūṣaṇa.

Remarks:—The Ms. is in a fairly good condition. For details see remarks under No. 7174 (Vol. XII).

॥ अद्वैततत्त्वदीपः ॥

7534. ADVAITATATTVADĪPAḤ.

Burnell's Catalogue No. 9649. Page 93. Left column. Substance—Palm leaf. Size—$18\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—144. Lines—11 to a Page Script—Grantha. No. of Granthas—2800. Author—Nityānanda. Incomplete. Not Printed.

Beginning:

नमस्कृत्वाथ रामाय गुरवे शङ्कराय च ।

अद्वैततत्त्वदीपोऽयं नित्यानन्देन वर्ण्यते ॥

ओं ॥ तत्त्वमसि अहं ब्रह्मास्मीत्यादि विधिवाक्यैर्जीवप-

रयोरैक्यं प्रतीयते । इयं च प्रतीतिर्मोक्षसाधनं । तथा हि ।

तत्त्वमसीत्यनेन जीवपरयोरैक्यं प्रतिपाद्य पुरुषं सोम्योत-
हस्तमानयन्त्यपहार्षीस्तेयमकार्षीत् परशुमस्मै तपत इति
स यदि तस्य कर्ता भववीत्यादिना त्वनृताभिसंधस्य
बन्धं सत्याभिसन्धस्य मोक्षं चाभिधाय तस्य तावदेव चिरं
यावन्न विमोक्ष्येऽथ संपत्स्य इति वाक्येन प्रारब्धकर्म-
क्षयोत्तरकालं ब्रह्मप्राप्तिरूपाया मुक्तेः प्रतिपादनादैक्य-
ज्ञानं मोक्षसाधनम् ॥

End:

बृहदारण्यकेऽविद्वांसोऽबुधो जना इति—

'आत्मानञ्चेद्विजानीयादयमस्मीति पूरुषः ।
किमिच्छन् कस्य कामाय शरीरमनुसञ्ज्वरेत् ॥'

इति हरिः ओं ॥

Colophon: Nil.

Subject: Advaitatattvadīpa.

Remarks:—The Ms. is in a fairly good condition. At the end of this work is given the following:—

"शैवे लेखनीयं ॥" व्यासस्मृतौ—

'अथोन्नमःशिवायेति मन्त्रेणानेन चार्चयेत् ।
नमस्कुर्यान्महादेवं अमृतं सत्यमीश्वरम् ॥'

शिवस्यान्तर्यामित्वं ईश्वरगीतायां—

"त्वामेकमीशं पुरुषं पुराणं
प्राणेश्वरं रुद्रमनन्तरूपम् ।
नमामि सर्वेन्द्रियसन्निविष्टं
प्रचेतसं ब्रह्ममयं पवित्रम् ॥"

शिवस्य जगत्कारणत्वमानुशा...

"अन्तश्च बहि...राद्भूतो विशेषनुत ।
हिरण्यगर्भहेतुश्च बहिर्भूतप्रयोजकः ॥
ब्रह्मा विष्णुः प्रपञ्चश्च यदीयांश........."

॥ अद्वैतसिद्धिः ॥

7535. ADVAITASIDDHIḤ

Burnell's Catalogue No. 9651. Page 93. Left column. **Substance**—Palm leaf. Size—$18\frac{1}{2} \times 1\frac{1}{2}$ **inches**. Leaves—56. Lines—8 to a Page. Script—Telugu. No. of Granthas—1900. Author—Madhusūdanasarasvati. Incomplete. Printed.

Beginning:

मायाकल्पितमातृतामुखमृषाद्वैतप्रपञ्चाश्रय-
स्सत्यज्ञानसुखात्मकश्श्रुतिशिखोत्थाखण्डधीगोचरः ।
मिथ्याबन्धविधूननेन परमानन्दैकतानात्मकं
मोक्षं प्राप्त इव स्वयं विजयते विष्णुर्विकल्पोज्झितः ॥

End:

ज्ञानस्य ज्ञानसंयोगसमवाययोरभावात् अन्य...था चानाध्यासिकत्वस्य संबन्धस्याभावत् । न च विषयवीभावः सः तस्य विषयत्वविषयित्वरूपस्य एकैकमात्रानिष्ठत्वेन द्विनिष्ठसंबन्धात्मकत्वासम्भवात् दुर्निरूपत्वाच्च । तथा हि विषयित्वं किं ज्ञानजन्यफलधारत्वं, किं वा ज्ञानजन्य... ।

Colophon: (Leaf No. 51)

इत्यद्वैतासिद्धावसतःसाधकत्वोपपत्तिः ।

Subject: Advaitasiddhi; up to the middle of the first Pariccheda.

Remarks:—The Ms. is in a fairly good condition.

This is a polemical work which establishes the supremacy of the Advaita after successfully refuting the several objections raised by the Dvaitins.

The Advaitasiddhi is the magnum opus of Madhūsūdanasarasvati and is considered as the crushing reply to Vyāsarājasvāmin's Nyāyāmṛta. This latter author lived between 1446 & 1539 A. D. Madhusūdana wrote his Advaitaratnarakṣaṇa as a criticism of Śaṅkaramiśra's Bhedaratna, which in turn is a Naiyāyika's criticism of the Khaṇḍanakhaṇḍakhādya. Śaṅkaramiśra lived after 1529 A. D. Madhusūdana Sarasvatī has written a commentary on Bopadeva's Harilīlāviveka and Appayyadīkṣita's Siddhāntaleśasaṅgraha. Thus he may be placed in the latter half of the 17th century A. D.

Vide-pp. 97-104. Vol. III. J. O. R., Madras.—The Age of Madhusūdanasarasvati by Mr. R. Kṛṣṇaswami Śāstri.

The work has been printed by the Nirṇayasāgar Press and edited by Pandit N. S. Anantakṛṣṇaśāstri.

ADVAITASIDDHI

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script	Complete or otherwise.
7536	B. L. 9824 a	Śrītāla.	$9\frac{1}{2} \times 1\frac{7}{8}$	67	10	Telugu.	Incomplete;
7537	N. S. 81	Palm leaf.	$5\frac{1}{2} \times 1\frac{1}{4}$	136	12	Grantha.	,,
7538	S. S. 99	,,	17×1	85	9	,,	,,
7539	,, 104	Śrītāla.	$14 \times 1\frac{1}{2}$	131	10	,,	,,

DETAILED REMARKS
on the
ADVAITASIDDHI MSS.
IN THE ABOVE TABLE.

7536 The other work contained herein is Advaitakāmadhenu.

॥ अद्वैतसिद्धिव्याख्या—लघुचन्द्रिका ॥

7540. ADVAITASIDDHIVYĀKHYĀ—LAGHUCANDRIKĀ.

N. S Collection No. 82.

Substance—Palm leaf. Size—$15\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—122 (28+57+37). Lines—6 to a Page. Script—Grantha. No. of Granthas—1800. Author—Brahmānanda. Incomplete. Printed.

Beginning:

नमो नवघनश्यामकामकामितदेहिने ।
कमलाकामसौदामकणकामुकगेहिने ॥

End:

आपातादिति ॥ तथा च शुद्धस्यावृतत्वे विशिष्टस्यापि तद्आवश्यकं । अत एव विशिष्टरूपेणापि गुरुत्वादिकमावृत-मिति भावः ॥ सदात्मनेति ॥ सद्भानानां....... ।

Subject: Advaitasiddhivyākhyā, Brahmānandīya otherwise known as Laghucandrikā up to

दृश्यत्वहेतूपपत्तिः ।

Remarks :—The Ms. is in a decaying condition.

This author is also called Gauḍabrahmānanda. He is said to have commented on all the works of Madhusūdanasarasvatī. He was the disciple of another commentator of Madhusūdanasarasvatī, Nārāyaṇatīrtha by name, who flourished about 1790 A. D. Hence Brahmānanda should have flourished in the beginning of the 19th century.

This commentary of his on the Advaitasiddhi is called Laghucandrikā. It has been criticised in the Mādhva work Nyāyabhāskara and defended in the Vedānta work, Nyāyenduśekhara by Tyāgarājamakhin.

This work has been printed in the Nirṇayasāgar edition of the Advaitasiddhi. He is also the author of a running commentary on the Brahmasūtras called Brahmasūtramuktāvalī. Vide No. 7106, Vol. XII.

॥ अद्वैतसिद्धिव्याख्या—लघुचन्द्रिका ॥

7541. ADVAITASIDDHIVYĀKHYĀ—LAGHUCANDRIKĀ.

S. S. Collection No. 92.

Substance—Śrī tāla. Size—13 × 1¾ inches. Leaves—61 (46+15). Lines—10 to 12 to a Page. Script—Grantha. No. of Granthas—2250. Author—Brahmānandā. Incomplete. Printed.

Beginning:

हरिः ओं

योग्यतायां इति ॥ बाधाभावरूपयोग्यतायास्तत्व-

विशिष्टरूपेण मिथ्यात्वबोधकशक्तिरूपा शब्दनिष्ठा वा सेति

भावः। आदिनाकाङ्क्षादेर्ग्रहणम् ॥ आप्तेति ॥ वाक्यार्थ-प्रमावदुक्तेत्यर्थकं प्रामाण्यायोगादिति । तथा च प्रमाण-शब्दबोध्यत्वेन स्वबोधकशब्दादिसमसत्ताकत्वं साध्यमि-ति भावः ।

End:

न चैवमपि अज्ञानविषयस्य ज्ञानाज्ञानाभ्यां व्याघात इति वाच्यम् । ज्ञानादिष्विवाज्ञानेपि विशेषणतया विष-यस्य साक्षिभास्यत्वसम्भवात् विषयकत्वविशिष्टैर्विद्यमाने-नाव्रतसाक्षिसम्बन्धरूपस्य साक्षिभास्यत्वस्य माध्वैरपि स्वीकारेण तत्र संशयाद्ययोग्यत्वस्य सर्ववादिसम्मतत्वात् । तथापि न जानामीति प्रत्यक्षे प्रमा विरोधित्वेन.... ।

Colophon: (Leaf No. 10)

तर्कैस्सारस्वतै रत्नैः चन्द्रिका चन्द्रभूषणैः ।
दुरन्तध्वान्तभङ्गाय प्रोक्तो मिथ्यात्वसङ्गतिः ॥

Subject: Advaitasiddhivyākhyā known as Brahmānandīya or Laghucandrikā; A fragment.

Remarks:—The Ms. is in good condition.

॥ अद्वैतसिद्धिव्याख्या—लघुचन्द्रिका ॥

7542. ADVAITASIDDHIVYĀKHYĀ—LAGHUCANDRIKĀ.

N. S. Collection No. 1.

Substance—Paper. Size—$9\frac{1}{2} \times 4\frac{3}{4}$ inches. Sheets—103. (70-122). Lines—12 to a Page. Script—Grantha. No. of Granthas—700. Author—Brahmānanda. Incomplete. Printed.

Beginning

...त्वं साध्यं व्याप्नोति न तु साधनमिति भावः। परे ....वानां शुक्तिरौप्यादीनामत्यन्तासत्त्वेन तेषु तदसिद्धेः। अपरोक्षतया भासमान एव हि अज्ञानविषयतानवच्छेदकत्वं। नित्यापरोक्षे त्वलीके तन्न भातीति प्रत्ययादज्ञानविषयतावच्छेदकत्वमेव।

End:

तादृशोपस्थिते युगसहस्रेणापि असम्भवात्। किं तु देशकालत्वव्यापकत्वेनात्यन्ताभावो निवेश्यः। तथा च तादृग्व्यापकत्वस्य सर्वदेशकालवाक्यघटितत्वेन स्वदे...।

Subject: Advaitasiddhivyākhyā, Laghucandrika or Brahmānandīya.

Remarks:—The Ms. is in good condition.

॥ अद्वैतामृतम् ॥

7543. ADVAITĀMṚTAM.

Burnell's Catalogue No. 6430. Page 92. Left column.

Substance—Paper. Size—$6\frac{1}{4} \times 4\frac{1}{4}$ inches. Sheets—50. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas

—600. Author—Jagannāthasarasvati. Complete. Not printed.

Beginning:

हरिहरसरस्वती यद्गुरुरीड्यः परमहंसानाम् ।
स जगन्नाथपदोत्तरसरस्वतीशब्दसंबोधः ॥ १ ॥

कर्मदिकण्ठालंकार ....वेदान्तवारिधेः ।
रचयत्यमलं ग्रन्थमद्वैतामृतनामकम् ॥ २ ॥

आसीद्यतिवरः कश्चित् विवेकाश्रमसंज्ञकः ।
यत्प्रसादेन बहवो मुक्तिमार्गमुपाश्रिताः ॥ ३ ॥

नवाकर्थकांवनंदुस्त्रिगजसंख्याविलोकिताः(?) ।
मठास्तेन जगत्यस्मिन् तेषु लेभे स्थितिं न सः ॥ ४ ॥

स स्वोचितं मठं लोके क्वचनापि विचारयन् ।
न चापश्यं मनो यत्र यतेस्तस्य प्रसीदति ॥ ५ ॥

एवं गिरिवरारण्यसरित्सागरवापिकाः ।
पश्यता किल तेनैक्षि पाञ्चजन्याभिधो नदः ॥ ६ ॥

द्विस्थू(?) कामगो रम्यो नवद्वारविभूषितः ।
स्वोचिताचारनिर्वृत्तियोग्यस्तीर्थपदाश्रमः ॥ ७ ॥

End:

जीवितं मरणं तन्वि परोपकृतिवर्जितं ।
मरणं जीवितं मन्ये यत्परोपकृतिक्षमम् ॥ ६५ ॥

इति प्रबोधिता चित्तवृत्तिस्तेनात्र योगिना ।
(विर)ता विषयेभ्यः सा ब्रह्मात्मैक्यमुपाददे ॥ ६६ ॥

प्राप्तस्यै…दवार्धेरवाप्तिः-
त्यक्तस्यैव क्लेशवार्धेस्तदाभूत् ।
त्यागो यस्मिन् तत्वमस्यादिवाक्यैः
जाता काले तादृशी चित्तवृत्तिः ॥ ६७ ॥

सहरिहरसरस्वतीयतीन्द्र-
द्युमणिकराभिहताज्ञतान्धकारः ।
जयति परमहंसयोगिवर्यो
नरहरिसंज्ञचि(दात्म)सक्तचित्तः ॥ ६८ ॥

जिताहारो जितक्रोधो जगन्नाथसरस्वती ।
तेनायं रचितो ग्रन्थो ह्यद्वैतामृतसंज्ञकः ॥ ६९ ॥

एतस्य कबलान् पञ्चास्वाद्य सादरतां गताः ।
अमृतत्वं प्रयान्त्याशु विबुधा यतिसत्तमाः ॥ ७० ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यहरिहरसरस्वतीप्रियशिष्यपरमहंसपरिव्राजकाचार्यजगन्नाथसरस्वतीविरचिते अद्वैतामृते पञ्चमः कबलः ।

Subject: Advaitāmṛtam a Vedāntic Prakaraṇa 1-5 Kabalas.

Remarks:—The Ms. is in a fairly good condition.

704

The author of this work is Jagannāthasarasvatī, pupil of Hari Hara Sarasvatī.

॥ इष्टसिद्धिः ॥

7544. IṢṬASIDDHIḤ.

Burnell's Catalogue No. 9851. Page 95. Left column. Substance—Palm leaf. Size—16½ × 1½ inches. Leaves—274. Lines—5-8 to a Page. Script—Grantha. No. of Granthas—4500. Author—Vimuktācārya. Incomplete. (Wants beginning). Printed.

Beginning:

....यानुभूतिरजागमे ॥

यानन्दात्मानन्दवि........ ।

...भेदादिजगन्मायाचित्रभित्तिर्बात्मात्मताम् ॥

इष्टानिष्टाप्तिहान्योरिष्टोः सतिसिद्धि[र्य]स्तदृशा श्रुतेः ।

तस्मात्तत्त्वेष्टसिद्ध्यर्थं विवृणोम्यात्मस........ ॥

....दृशेः येन स्वतस्सिद्धतां द्योतयति । अनुभूतेरनुभाव्यत्वे घटादिवदननुभूतित्वप्रसङ्गाच्च च स्वतःसिद्धं लैप्रागभावादेः स्वतोऽन्यतो वा सिध्यन्ति । ततो जागतोऽस्थानान्येऽपि भावविकाराः जन्मास्मिन्स्या तेषां चेत्यानां च न विव्यर्थत्वं रूपादिवदतोऽमेयानास्यामेयोऽयमाप्यस्मीत्यर्थः(?) ।

End:

आत्मैको निष्क्रियोऽनन्तोऽद्वयोऽनुभवविग्रहः ।
अतमस्तं(स्को) जन्मा(ना)त्मस्थो ज्योतिषां ज्योतिरात्मभाः ॥

सर्वेष्टः परमानन्दो वेदान्तात्मप्रमाणगः ।
इत्येषोऽर्थो विशेषेण मयेष्टो वेदविन्मतः ॥

अर्थश्चायमनिर्वाच्यः यदविद्या प्रासिष्यति ।
न्यचीचरमविद्यां तां स्रुत इष्टार्थसिद्धये ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यात्म(बोध)पूज्यपादशिष्य
विमुक्ताचार्यस्य कृतौ इष्टसिद्धावष्टमोऽध्यायः ।

येनैव निर्जिताः सर्वे वादिनो न्यायमुद्रिताः ।
वादिमुद्र(रिणं) वन्दे विमुक्तात्माभिधं यतिम् ॥

Subject: Iṣṭasiddhi, in eight adhyāyas.

Remarks:—The Ms. is in good condition, and is full of scriptorial blunders.

This work is being edited by Prof. Hiriyanna for the Gaikwad Oriental Series.

॥ खण्डनखण्डखाद्यव्याख्या ॥

7545. KHAṆḌANAKHAṆḌAKHĀDYA-VYĀKHYĀ.

Burnell's Catalogue No. 6371. Page 93. Left column.

Substance—Paper. Size—$11\frac{1}{2} \times 3\frac{3}{8}$ inches. Leaves—

155. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—4800. Author—Śaṅkaramiśra. Complete. Not printed.

Beginning:

हरिशंकरयोस्सितासितं
भुजगारातिभुजंगलाञ्छनम् ।
वपुरस्तु मुदे विरुद्धयोः
अपि संसर्गि न भिन्नतां गतम् ॥

विरुद्धधर्मद्वयसन्निपाते-
ऽप्यभेद एवेति विभावयन्तः ।
पुनातु भेदप्रतिभासशून्यं
स्त्रीपुंसरूपं शिवयोश्शरीरम् ॥

भवनाथसूक्तिगुम्फन-
मिह खण्डनखाद्यटीकायाम् ।
श्रीशंकरेण विदुषा
विदुषामानन्दवर्धनं क्रियते ॥ ३ ॥

प्रारिप्सितप्रतिबन्धकदुरितनिवारणकारणेष्टदेवतानमस्काररूपमङ्गलं कुर्वन्नेव प्रेक्षावत्प्रवृत्त्यङ्गप्रयोजनाभिधेयसंबन्धं प्रति.. परः परमतनिराचिकीर्षया स्वमते ब्रह्माद्वैतस्थापनां वैतण्डिकोऽपि स्वप्रौढिप्रकाशनाय सूचयन्नाह । अविकटेति ।

End:

कोऽसौ विशेष इति वादिप्रश्नेन निर्वचनमावश्यकम-

न्यथा सर्वत्र सामान्येनैवोत्तरं स्यादिति परिहरति ।

तस्येति ।

व्याख्यानमिदमस्माकं यथा पितृवचस्तथा ।

व्याख्यानगुणदोषाभ्यां संबन्धो मत्पितुर्न मे ॥

Colophon:

इति श्रीमहामहोपाध्यायमिश्रश्रीशंकरकृतं प्रथमखण्डनखाद्या-
नन्दवर्धनपुस्तकं समाप्तम् ।

संवत् १६५९ समे आश्विनवदि अष्टमीसमये...वरशुक्रवासरे ।

Subject: Khaṇḍanakhaṇḍakhādyavyākhyā; First khaṇḍana only.

Remarks:—The Ms. is in a fairly good condition. On the title page is given—

वरखेडीशेषग्रन्थः

Extracts from this work are published in the Chowkhamba edition of Khaṇḍanakhaṇḍakhādya. The author of this work is the son of Bhavanāthamaithila and is the author of other works chief of them being a commentary named Upaskāra on Vaiśeṣikasūtras a commentary on Udayanācārya's Ātmatattvaviveka, Rasārṇava, and Vādavinoda. From the last śloka above the colophon we see that his father was a great scholar and Vedāntin to whom he ascribes the credit of the work. The Ms. is dated A. D. 1602.

॥ तत्त्वप्रक्रिया ॥

7546. TATTVAPRAKRIYĀ.

Burnell's Catalogue No. 9811 b. Page 94. Right column.

Substance—Palm leaf. Size—18¼ × 1½ inches. **Leaves —5** (2-6). Lines—**15** to a Page. Script—Telugu. No. of Granthas—800. Author—Anantadeva ? Incomplete. Not printed.

Beginning:

ओम् ।

सर्ववेदान्तसिद्धान्तसंप्रदायानुसारतः ।
नमस्कृत्य गुरून् वक्ष्ये प्रक्रियां तत्त्वसंश्रयाम् ॥

यच्छ्रीमद्रामतीर्थेभ्यः संप्रदायसमागतं ।
श्रुतं सत्तर्कसचिवं विविच्य तदिहोच्यते ॥

अखण्डमद्वितीयं आनन्दैकरसं स्वप्रकाशं चैतन्यमेव जगतः तत्त्वम् । अनिर्वचनीयस्येव सर्पस्य रज्जुः कथं तर्हि जीवेश्वरविभागप्रतिपत्तिरिति चेत् अज्ञानरूपादुपाधेरिति ।

End:

" आतुराणां तु सन्यासे न विधिर्नैव च क्रिया ।
प्रैषमात्रं समुच्चार्य सन्यासं तत्र पूरयेत् ॥ "

इति स्मृतेश्च न सर्वानुष्ठानं । 'सन्यासाद्ब्रह्मणस्स्थानं' इति स्मृतेश्च कर्मणा पितृलोकं आनुषङ्गिकफलसमर्पकत्वात् । तस्मात् सन्यासो ज्ञानाङ्गमेव न श्रवणाङ्गमिति.... ।

Subject: Tattvaprakriyā, a short Prakaraṇa.

Remarks:—The Ms. is in a fairly good condition. The other work contained herein is Advaitamakarandavyākhyā. The author

of this work calls himself the pupil of Rāmatīrtha who is also the Guru of Anantadeva the author of Siddhāntatattva. Besides Anantadeva wrote a commentary on this work wherin he calls himself as the pupil of the same Rāmatīrtha. So both the author of this work and its commentary are desciples of Rāmatirtha and are contemporaries and should have lived in the 16th century A. D. Anantadeva may be the author of both this work as also its commentary.

॥ तत्त्वप्रक्रियाव्याख्या—सम्प्रदायनिरूपणम् ॥

7547. TATTVAPRAKRIYĀVYĀKHYĀ—SAMPRADĀYANIRŪPAṆAM.

Burnell's Catalogue No. 9812. Page 94. Right column. **Substance**— Palm leaf. Size—$18\frac{3}{4} \times 1\frac{3}{4}$ inches. Leaves—15. Lines—16-17 to a Page. Script—Telugu. No. of Granthas—2000. Author—Anantadeva ?. Incomplete. Not printed.

Beginning:

वेदान्तनयसिद्धान्तपरीक्षणविचक्षणान् ।
नमामि तातचरणान् श्रीमद्गोविन्दविग्रहान् ॥

श्रीरामतीर्थचरणस्मरणस्य प्रसादतः ।
प्रस्थानत्रयसिद्धान्तसंप्रदायः प्रदर्श्यते ॥

सिद्धान्ततत्त्वव्याख्यानव्याजेन विशदीकृतम् ।

वेदान्तसम्प्रदायार्थं गृह्णन्तु ज्ञानकामिनः ॥

सम्यङ्निरूपितमिदं यदि नाद्रियन्ते-
दुष्टा निकृष्टमतयो हृदि मत्सरेण ।
किं तावता....वता मम चेन्न जातु
दुग्धस्य शुद्धमधुरस्य विमोक्षणं स्यात् ॥

चिकीर्षितं प्रतिजानीते ॥ सर्ववेदान्तेति ॥ सर्वश्चासौ वेदान्तसिद्धान्तश्चेति । विवरणाचार्यवार्तिककारादिकृतनिरूपणाभेदेनानेकविधत्वमापन्नस्य क्वापि वेदान्तसिद्धान्तो निरूप्यत इति भावः ।

End:

न च प्रस्थानत्रये दृष्टिसृष्टिवादे ईश्वरो नास्तीति क्वचिद्ग्रन्थोक्त(?) परमार्थतो नास्तीति तु व्यवहारवादेऽपि तुल्यं । उपसंहरति ॥ तस्मादिति ॥

धर्मावधीनां करुणावधीनां
श्रीमद्गुरूणां चरणावलम्बात् ।
यत्सम्प्रदायं श्रुतिसंप्रभाय(दायं)
निरूपितं तुष्यतु तेन विष्णुः ॥

इत्येषा वाङ्मया पूजा तुरगास्यस्य पादयोः ।
अर्पिता तेन मे देवः प्रीयतां परमेश्वरः ॥

Colophon:

इति श्रीमदापदेवसूनुना अनन्तदेवेन कृतं सम्प्रदायनिरूपणं समाप्तम् ॥

Subject: Tattvaprakriyāvyākhyā otherwise known as Sampradāyanirūpaṇa.

Remarks:—The Ms. is in good condition. There are lacunae in the Ms. For details about the author see notes under No. 7547.

॥ तत्त्वानुसन्धानम् ॥

7548. TATTVĀNUSANDHĀNAM.

Burnell's Catalogue No. 6352. Page 92. Left column. Substance—Paper. Size—10½ × 4½ inches. Sheets—2-27. Lines—11-13 to a Page. Script—Devanāgarī. No. of Granthas—850. Author—Mahādevasarasvati. Incomplete. Printed.

Beginning:

........"अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ।" "ज्ञानेन तु तदज्ञानमेषां नाऽस्ति........ ॥" इति स्मृतेश्च । तच्च ज्ञानं द्विविधं । मायाविद्याभेदात् । शुद्धसत्त्वप्रधानं स तु मायेत्युच्यते ।

End:

'यदुकुलवररत्नं कृष्णमन्यांश्च देवान्
मनुजपशुमृगदीन् ब्राह्मणादीन् न जाने ।
परमसुखसमुद्रे मज्जनात्तन्मयोऽहं
गलितनिखिलभेदः सत्यबोधैकरूपः ॥ ७ ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशसरस्वती-

पूज्यपादशिष्यभगवन्महादेवसरस्वतीमुनिविरचितं तत्त्वानुसन्धानं समाप्तम् ॥

Subject: Tattvānusandhāna in four chapters i. e.

1 मायापञ्चीकरणादिनिरूपणम् । 2 वृत्यादिनिरूपणम् ।

3 स्मृतिप्रामाण्यादिनिरूपणम् । 4 मुक्तिस्वरूपनिरूपणम् ।

Remarks:—The Ms. is in a fairly good condition.

This work is published along with Brahmasūtradīpikā in the Benares Sanskṛt series. This auther is also the author of a commentary on Kapila's Sāṅkhyasūtras which is called Sāṅkhyavṛttisāra. He is a desciple of Swayamprakāśayati an anthor of many Vedāntic works.

॥ नैष्कर्म्यसिद्धिः (सव्याख्या) ॥

7549. NAIṢKARMYASIDDHIḤ (SAVYĀKHYĀ).

S. S. Collection No. 34.

Substance—Paper. Size—12 × 5¾ inches. Sheets—119. Lines—14 to 16 to a Page. Script—Devanāgarī. No. of Granthas—3500. Author—Sureśvara. Complete. Printed.

Beginning:

मूलं ॥ आब्रह्मस्तम्बपर्यन्तैः सर्वप्राणिभिः सर्वप्रकारस्यापि दुःखस्य स्वरसत एव जिहासितत्वात् तन्निवृत्त्यर्थो प्रवृत्तिरस्ति स्वरसत एव ।

व्याख्या ॥

श्रीगणेशाय नमः । श्रीरामचन्द्राय नमः ।

विष्णोस्तत्परमं धाम द्योतमानं निजश्रिया ।
अनन्तामितमद्वैतमात्मभूतं पुनातु नः ॥ १ ॥

तेजस्त्रैयम्बकं भूयात् भूयसे श्रेयसे मम ।
यदाचामति निश्शेषं भक्तानां भववारिधिम् ॥ २ ॥

नैष्कर्म्यसिध्यभिधया सुधया सुधियां व्यधात् ।
योऽमृतत्वं नमामस्तं सुरेश्वरसुधानिधिम् ॥ ३ ॥

तर्कोदग्रनखोद्भिन्नवादिदैत्यभुजान्तरः ।
प्रह्लादयतु नश्शश्वत् ज्ञानोत्तममृगोत्तमः ४ ॥

चोलेषु मंगलमिति प्रथितार्थनाम्नि
    ग्रामे वसन् पितृगुरोरभिधां दधानः ।
ज्ञानोत्तमः सकलदर्शनपारदृश्वा
    नैष्कर्म्यसिद्धिविवृतिं कुरुते यथावत् ॥

व्याचिख्यासितायाः श्लोकसन्दर्भरूपायाः नैष्कर्म्यसिद्धेराधिकारिप्रयोजनतत्साधनसंबन्धविषयाणामभावादनारम्भमाशङ्क्य स्वयमेव सम्बन्धोक्तिं कुर्वन्नाचार्यः प्रकरणारम्भसिध्यर्थं क्रमेण तानुपपादयति । आब्रह्मस्तम्बपर्यन्तैरित्यादिना ॥

End:

मूलं ॥

वेदान्तोदरवर्तिभास्वदमलं ध्वान्तच्छिदस्मद्धियो
    दिव्यं ज्ञानमतीन्द्रियेऽपि विषये व्याहन्यते न क्वचित् ।
यो नो न्यायशलाकयैव निखिलं संसारबीजं तमः
    प्रोत्सार्यात्विरकार्षीद्गुरुगुरुः(?) पूज्याय तस्मै नमः ॥ ७७ ॥

सम्बन्धोक्तिरियं साध्वी प्रतिश्लोकमुदाहृता ।
नैष्कर्म्यसिद्धेर्ज्ञात्वेमां व्याख्या तस्य भवेद्ध्रुवम् ॥ ७६ ॥

व्याख्या ॥ किङ्कुर्वन्नाविरकार्षीत्तत्राह ॥ सकलसंसार-बीजं तमो न्यायशलाकया प्रोत्सारयन् य एवमाविरकार्षी-त्तस्मै नमः इति सम्बन्धः । निवृच्छार्दूलविक्रीडितमेतत् न्यूनाधिकेन निचृद्भूरिजावित्युक्तत्वात् ॥ ७७ ॥

......स्थानक्षमतात्पर्यपरिज्ञाने किङ्कारणमित्याशङ्का-यां सम्बन्धोक्तिरेवेत्याह — सम्बन्धोक्तिरिति ॥

पदकशतहतकुमारिल-
सौगतगुर्वक्षपादकणभक्ष्यः ।
यमनियमनिलयधिषणो
जयति श्री सत्यबोधा[चा]र्यः ॥ १ ॥

वस्तुख्यातिविघातिवादितिमिरं नैष्कर्म्यसिद्धिस्फुट-
व्याख्याचन्द्रिकया विधूय सुधियां संदृष्टिमुन्मीलयन् ।
अन्तस्सम्भृतशान्तिवेदनसुधोद्धो(द्यो)तः समुद्यातते
सर्वज्ञाश्रमचन्द्रमास्त्रिजगतीसर्वज्ञचूडामणिः ॥ २ ॥

Colophon:

मूलम् ॥ इति श्रीमच्छङ्करभगवत्पूज्यपादशिष्य श्रीमत्सुरेश्वरा-चार्यविरचितायां सम्बन्धोक्तौ चतुर्थोऽध्यायः सम्पूर्णमस्तु ॥

व्याख्या ॥ इति श्रीमहोपाध्यायज्ञानोत्तममिश्रविरचितायां नैष्क-र्म्यचन्द्रिकायां चतुर्थोऽध्यायः समाप्तः ॥

Subject: Naiṣkarmyasiddhi, with the commentary Naiṣ-karmyacandrikā 1–4 Adhyāyas.

Remarks:—The Ms. is in a fairly good condition. This is a Ms. of the text of Sureśvara's Naiṣkarmyasiddhi with the commentary called Candrikā by Jñānottamamiśra. The text along with the commentary was published in Benares Sanskṛt Series in 1904. The Bhandarkar Research Institute Poona has recently brought out a critical edition of this work.

॥ पञ्चकोशविवेकः ॥

7550. PAÑCAKOŚAVIVEKAḤ.

Ms. Not noticed by Burnell No. 15570 c.

Substance—Paper. Size—16¼ × 1½ inches. Sheets—24 (235-258). Lines—5 to a Page. Script—Telugu. No. of Granthas—480. Author—? Complete. Not printed.

Beginning:

श्री रामचन्द्राय नमः ॥

किं रूपाः पञ्चकोशाः स्युः का वा यद्व्यतिरिक्तता ।
आत्मनश्चेति तत्सर्वं सदृष्टान्तं विचार्यते ॥

आत्मकु पञ्चकोशलकुण्टेनु व्यतिरिक्तत्वमु यदुवलेननि
विचारिम्पुचुन्नारमु ॥

End:

भूतभौतिकभावेषु स्वकार्येषु सदात्मना ।
व्यापीदृष्टस्ततो ह्यात्मा देशान्नास्य परिच्युतिः ॥
अदेहित्वादनादित्वादबाध्यत्वान्न विद्यते ।
वर्तमानागतागामिकालेश्योप्यपरिच्युतिः ॥

सर्वाभिन्नस्वरूपेण सर्वात्मत्वात्सदात्मनः ।
सर्वेभ्यो वस्तुजालेभ्यः परिच्छित्तिर्न विद्यते ॥

न व्यापित्वाद्देशतोऽन्तो नित्यत्वान्नापि कालतः ।
न वस्तुतोऽपि सर्वात्म्यात् आनन्त्यं ब्रह्मणि त्रिधा ॥

अखण्डात्माऽहमेवायं इत्येवं यो विजिज्ञिवान् ।
स सर्वसंमृतेर्मुक्तो ब्रह्मानन्दं समश्नुते ॥

किमनेन बहूक्तेन निर्णीतौ द्वौ महात्मभिः ।
अविचाराद्धि संसारो विचारान्मोक्ष इत्यपि ॥

प्रमादादप्रमादाद्वा यदज्ञानान्मयेरितम् ।
तदभ्यन्तु(?) समालोक्य पण्डिताः समदर्शिनः ॥

श्री गुरुचरणार्पितमस्तु ॥

Subject: Pañcakośaviveka. This is a short treatise dealing with Pañcakośas.

Remarks:—The Ms. is in good condition. The other works contained herein are:— 1. Brahmavidyāsudhārṇava 1—174. 2. Adhyāropapam 175—234. The author of this work seems to be a Telugu Brahmin.

॥ पञ्चकोशविवेकव्याख्या ॥

7551. PAÑCAKOŚAVIVEKAVYĀKHYĀ.

P. A. Collection No. 114.

Substance—Paper. Size—12¼ × 4¾ inches. Sheets—16. Lines—8-9 to a Page. Script—Devanāgarī. No. of Gran-

thas—225. Author—Rāmakṛṣṇa. Complete. Not printed.

Beginning:

श्रीमहागणाधिपतये नमः । श्रीगुरुभ्यो नमः ॥

नत्वा श्रीभारतीतीर्थविद्यारण्यमहेश्वरान् ।
पञ्चकोशविवेकस्य कुर्वे व्याख्यां समासतः ॥

तैत्तिरीयोपनिषत्तात्पर्यव्याख्यानरूपं पञ्चकोशविवेकाख्यं प्रकरणमारभमाणः आचार्यः तत्र श्रोतृप्रवृत्तिसिद्धये सप्रयोजनमभिधेयं सूचयन् सुखं ...चिकीर्षितं ग्रन्थं प्रतिजानीते गुहाहितमिति ।

॥ मू ॥

गुहाहितं ब्रह्म यत्तत्पञ्चकोशविवेकतः ।
बोद्धुं शक्यं ततः कोशपञ्चकं प्रविविच्यते ॥

End:

मू । पुत्रादेरविवक्षायां न पिता न पितामहः ॥
तद्वदीशो नापि जीवः शक्तिकोशविवेचने ॥ ४२ ॥
एवं ब्रह्मवदेवैषः ब्रह्मैव भवति स्वयम् ।
ब्रह्मणा नास्ति जन्मातः पुनरेष न जायते ॥ ४३ ॥

व्याख्या ।

ब्रह्मणस्तावत् जन्म नास्ति । अत एव विद्वानपि स्वात्मनस्तद्रूपत्वावगमात् नैव जायते । न स पुनरावर्तत इति श्रुतेः ।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण रामकृष्णाख्यविदुषा विरचिता पञ्चकोशविवेकव्याख्या समाप्ता ।

ओं श्रीसाम्बशिवाय परब्रह्मणे नमः ॥

Subject: Pañcakośavivekavyākhyā with text.

Remarks:—The Ms. is in a fairly good condition. For details refer No. 7432.

॥ पञ्चरत्नप्रकाशः (समूलः) ॥

7552. PAÑCARATNAPRAKĀŚAḤ—SAMŪLAḤ.

Burnell's Catalogue No. 9914 e. Page 95. Left column. Substance—Palm leaf. Size—13×1 inches. Leaves—10 Lines—7 or 8 to a Page. Script—Grantha. No. of Granthas—250. Author—Subrahmaṇya. Complete. Not printed.

Beginning:

श्रीगणपतये नमः । ब्रह्मणे नमः ।

प्रणवं प्रणतार्तीनां हरणं शरणं भजे ।
भूरादयस्त्रयो लोका यदुपक्रमसंभवाः ॥

ब्रह्मादिभ्यः श्रीगुरुभ्यो नमोवाक्रमधीमहे ।
जायते यदनुस्मृत्या सद्यो विद्याविमुक्तिदा ॥

स्थूलानक्षैर्विविधविषयाञ्जागरे विश्वनामा
स्वप्ने सूक्ष्मान्विरतकरणस्तैजसो मानसेन ।

प्राज्ञः सुप्तावनुभवति यः स्वात्मनैव स्वसौख्यं
तिस्रोऽवस्थाः स्वयमतिपतन् सोऽसि स ज्योतिरात्मा ॥

श्रीकृष्णानन्दयोगीन्द्रचरणांबुजरेणुना ।
पञ्चरत्नप्रकाशोऽयं सुब्रह्मण्येन तन्यते ॥

इह खलु तावदतीतानादिभवपरंपराकृतसुकृतसंपदा व-
र्जितपरमेश्वरानुग्रहेणापवर्जितसकलहृदयकलुषतया समाव-
र्जितविवेकवैराग्यशमदमादिसाधनकलापस्य मनुष्यपितृ-
देवलोकसाधनभूतपुत्रकर्मवित्तैषणाभ्यो व्युत्थाय भिक्षा-
मात्राकलितदेहयात्रस्य ।

* *

तत्राप्याद्श्लोकेनात्मनो देहाद्यभिमानकृतरूपभेदान्व-
क्ष्यमाणयोगोपयोगितया विभज्य दर्शयति ॥

अध्यात्मश्चाधिदैवं प्रति नियतविधास्थूलसूक्ष्माङ्कमाया
संभेदोपाधिभेदात्पुरुषमनुगतास्त्रिशो रूपभेदाः ।
विश्वो वैश्वानरश्च प्रथमयुगमथो तैजसात्मा च सूत्रं
प्रज्ञात्मा चेश्वरश्चेदपरमथपर(?)स्यात्तुरीयस्तु साक्षी ॥

End:

इत्यभ्यासक्रमेण प्रशमितमितधीरात्तसर्वात्मभावो
रूढेशात्माभिमानो हृदि निरहमभीमानवृत्तौ सयोगी ।
...द्यातमस्तं निजमहिमहितज्योतिरात्मा तुरीयो
निर्वाणैकस्वभावं विहरति परमानन्दपीयूषसिन्धौ ॥

अत्र श्लोके स्थूलदेहे पृथिव्यादिमहाभूतांशान्

* *

युक्त एव सन्यावदारब्धं वासनामात्रेण "बालः क्रीडनकैरिव" यथोपनीतविषयैर्लोकयात्रामनुवर्तत इत्यर्थः। तस्य तावदेव चिरं यावन्न विमोक्ष्ये संपत्स्ये स तत्र पर्येति जक्षत्क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा नोपजनं स्मरन्निदं शरमित्याद्यादिश्रुतिरिति सर्वं शिवम् ॥

शिवाय शिवरूपाय ब्रह्मणे परमात्मने ।
मनस्सङ्कल्पिताङ्गाय नमः श्रीगुरुमूर्तये ॥

श्रीवत्सान्वयवारिधेरुदभवत् यो लब्धविद्यो गुरोः
कृष्णानन्दसरस्वतीयतिवरात्तत्पादुकासक्तधीः ।
यस्मिन्देशिकपादसङ्गिसलिलं ध्वान्तं निहन्त्यान्तरं
सूते वाङ्मयमौक्तिकानि विदुषां धार्याणि कण्ठस्थले ॥

व्यतानि तेन विदुषां प्रीतये देशिकाज्ञया ।
पञ्चरत्नप्रकाशोऽयं सुब्रह्मण्येन वर्णिना ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीकृष्णानन्दसरस्वतीकरुणालेशलब्धविद्येन श्रीवत्सवंशमुक्ताफलेन सुब्रह्मण्येन कृतः पञ्चरत्नप्रकाशः सम्पूर्णः ॥

बालरामतीर्थस्येयं लिपिः पुस्तकं च ॥

Subject: Pañcaratnaprakāśa, a commentary on Pañcaratna a minor work in Vedānta.

Remarks:—The Ms. is in good condition. For the other works contained herein see remarks under No. 936. Nothing is known about the author except that he belonged to Śrīvatsagotra and he was the desciple of one Sri Kṛṣṇānanda who it is believed to be the famous author of Siddhāntasiddhāñjanam.

॥ प्रणवदीपिका ॥

7553. PRAṆAVADĪPIKĀ.

Not noticed by Burnell Ms. No. 15018.

Substance—Paper. Size—$11\frac{1}{2} \times 5\frac{3}{4}$ inches. Sheets—29. Lines—10 to a page. Script—Devanāgarī. No. of Granthas—2180. Author—Brahmānanda. Complete. Not printed.

Beginning:

सच्चिदानन्दरूपं (वै) जयति ब्रह्म निर्गुणम् ।
देवकीसुतकृष्णाय तस्मै श्रीगुरवे नमः ॥ १ ॥

सच्चिदानन्दकृष्णाय शक्तिरूपधराय च ।
सदा पुरुषधारिण्यै ललितायै नमो नमः ॥ २ ॥

स्मृत्वा श्रीगुरुपादाब्जं मोहजालहरं महः ।
सगुणां निर्गुणाञ्चैव कुर्वे प्रणवदीपिकाम् ॥

सदेव सोम्येदमग्र आसीत् * *
सदेवेत्यादिश्रुतिभिर्वर्णितं वस्तु केवलं ।
तदेव ब्रह्म प्रणव इति विद्वद्भिरुच्यते ॥

End:

सद्गुरुकृपया प्रोक्तं स्वस्वरूपं भजाम्यहम् ।
निर्द्वन्द्वो निर्ममो भूत्वा सदा साधुसमागमः ॥ १ ॥
शिष्यं मां श्रीगुरुस्साक्षात्स्वस्वरूपं चकार हि ।
श्रवणादिभिरुत्पाद्य ज्ञानं भ्रमरकीटवत् ॥ २ ॥
एवं विविच्य यो विद्वान् सकृत्प्रणवदीपिकाम् ।
स्वयंप्रणवरूपेण भासयेदखिलं जगत् ॥ ३ ॥
पूर्णं ब्रह्म गुरुः पूर्णः पूर्णोऽहमखिलं जगत् ।
पूर्णं सर्वमिदं ज्ञात्वा पुनरावर्तते कुतः ॥ ४ ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीसच्चिदानन्दगुरुचरणाकिङ्करेण ब्रह्मानन्दाख्यविदुषा विरचिता प्रणवदीपिका सम्पूर्णा ॥

Subject: Praṇavadīpikā with Mahraṭhi commentary.

Remarks:—The Ms. is in good condition.

This author calls himself the desciple of Sacchidānanda and has to be distinguished from the author of the famous Laghucandrikā or Gauḍabrahmānandīya.

॥ परमार्थसारः ॥

7554. PARAMĀRTHASĀRAḤ.

Burnell's Catalogue No. 4896. Page 93. Right column.

Substance—Paper. Size—$8\frac{1}{2} \times 4\frac{7}{8}$ inches. Sheets—8. Lines—9 to 11 to a Page. Script—Devanāgarī. No. of Granthas—92. Author—Śeṣa. Complete. Printed.

Beginning:

श्रीगणेशाय नमः ॥

गर्भगृहवाससङ्कुचि(म्भव)

जन्मजरामरणविप्रयोगदुःखाब्धौ ।

जगदालोक्य निमग्नं

प्राह गुरुं प्राञ्जलिश्शिष्यः ॥ १ ॥

त्वं साङ्गवेदवेत्ता

छेत्ता संशयगणस्य ऋतवक्ता ।

संसारार्णवतरणे

प्रश्नान्पृच्छाम्यहं भगवन् ॥ २ ॥

End:

वेदान्तशास्त्रमखिलं

विलोक्य शेषस्तु जगदाधारः ।

आर्यापञ्चाशीत्या

बबन्ध परमार्थसारमिदम् ॥ ८५ ॥

Colophon:

इति श्रीमच्छेषविरचितं परमार्थसारशास्त्रं समाप्तम् ॥

Subject: Paramārthasāra known as Śeṣārya and Āryāpañcāśīti a short summary in Āryā metre on the principles of Advaita Vedānta.

Remarks:—The Ms. is in a fairly good condition.

